अक्षतः पृष्ठतस्तस्मात् क्रान्तिवृत्ते त्रिभेऽन्तरे । तयो याम्योत्तरैकत्वात् तत्र नो वलनं स्फुटम् । न स्पष्टवलनाभावस्तत्र स्यादुत्क्रमज्यया । क्रमज्यया ततः कार्यं दाढ्यार्थं कथ्यते पुनः । सर्वतः क्रान्तिसूत्राणां ध्रुवे योगो भवेद्यतः । विषुवन्मण्डलप्राच्या ध्रुवे याम्या तथोत्तरा । सर्वतः क्षेपसूत्राणां ध्रुवाज्जिनलवान्तरे । योगः कदम्बसंज्ञोऽयं ज्ञेयो वलनबोधकृत् । तत्रापमण्डलप्राच्या याम्या सौम्या च दिक् सदा । कदम्बभ्रमवृत्तं च बध्नीयात् परितो ध्रुवात् । गोले तु जिनतुल्यांशैस्तत्र ज्या क्रान्तिशिञ्जिनी । सर्वतः समवृत्ताच्च याम्योदक्कुजसंगमे । तत्तिर्य्यग्गतसूत्राणां योगः स खसंज्ञकः । समध्रुवकदम्बानामुपरि द्युचराद्भवेत् । सूत्राणि वृत्तरूपाणि वलनानि तदन्तरे । अक्षजं वलनं मध्ये स्यात् समध्रुवसूत्रयोः । कदम्बध्रुवसूत्रान्तरायनं च त्रिभे ग्रहात् । कदम्बसमसूत्रान्तः स्फुटं सर्वदिशां च तत् । अथ वा परितः खेटात् खाङ्कभागान्तरे न्यसेत् । त्रिज्यावृत्तं ततस्तत्र विषुवत्समवृत्तयोः । मध्येऽक्षवलनं विद्याद्विषुवत्क्रान्तिवृत्तयोः । अन्तरं चायनं क्रान्तिसमवृत्तान्तरे स्फुटम् । तत्रापमण्डलं प्राची तथा याम्योत्तरः शरः । वलनानयने क्षेपः क्षिप्तो यैस्ते कुबुद्धयः । नक्रादिस्थ कदम्बस्य स्यातां याम्योत्तरे समम् । आयनं वलनं तस्मान्नायनादौ प्रजायते । ततो भ्रमति गोले स मकरादिर्यथा यथा । तथा तथा भ्रमत्येष कदम्बो निजमण्डले । कुम्भाद्यावथ मीनादौ याम्योदग्वलयिष्यते । जायते वलनं तद्यत् सौम्यसूत्रकदम्बयोः । अन्तरं शिञ्जिनीरूपं कदम्बभ्रममण्डले । अयनान्तकालांशक्रमक्रान्तिज्यका हि सा । उत्क्रमज्या यतो बाणः शिञ्जिनी तु क्रमज्यका । सत्रिभार्कात् क्रमक्रान्तिज्यातो वलनमायनम् । यैरुक्तमुत्क्रमक्रान्त्या भ्रान्त्या तैर्नाशितं हि तत् । युक्त्यानयैव विज्ञेयमक्षजं च क्रमज्यया । परोक्तिरन्यथा ब्रूयाद्यः परान्न प्रदूषयेत् । तस्यैव दूषणं तद्धि न दोषोऽतोऽन्यदूषणे । उत्क्रमज्यानिरासोऽयमन्यथा वाथ कथ्यते । जिनांशैर्जिनवृत्ताख्यं कदम्बात् परितो न्यसेत् । क्रान्तियाम्योत्तरं वृत्तं कदम्बद्वयकीलयोः । प्रोतं कृत्वा चलं न्यस्तं दन्वान्ते स्याद्ध्रुवोपरि । दन्वान्ताच्चाल्यतेऽभीष्टैस्तैरेव चलति ध्रुवात् । जिनवृत्ते तदंशानां तत्र ज्या क्रान्तिशिञ्जिनी । आयनं तैव वलनं द्युज्यापे जायते ग्रहात् ।

ग्रहध्रुवान्तरे यस्माद्द्युज्याचापांशकाः सदा । त्रिज्यावृत्ते यतो देयं तत्रातः परिणाम्यते । एवमक्षांशकैर्वृत्तं खमाख्यात् परितो न्यसेत् । समकीलकयोः प्रोतं तथा याम्योत्तरं चलम् । तत्तत्खेटोपरि न्यस्तं यैरंशैः खार्धतो नतम् । समण्डलेऽक्षवृत्ते च तैरेव स्यान्नतं ध्रुवात् । समवृत्तनतांशज्याक्षज्यापरिणताक्षजम् । द्युज्यापे वलनं प्राग्वत् त्रिज्यापे परिणाम्यते । उपपत्त्यानया सम्यक् समवृत्तनतांशजम् । वलनं स्यात् तथा वच्मि स्वाहोरात्रनतादपि । अथान्त्यतलयोर्योगः समदिक्कोऽन्यथान्तरम् । तत्त्रिज्यावर्गविश्लेषपदभक्ताक्षशिञ्जिनी । नताहृदोर्ज्यया क्षुण्णा वलनं पलजं स्फुटम् । नतं खाङ्काहतं भक्तं द्युदलेनाप्तभागकैः । क्रमज्याक्षज्यया क्षुण्णा स्थूलं वा द्युज्यया हृता । द्युज्यावृत्तापवृत्तैक्ये न्यसेद्वा रविमण्डलम् । बिम्बाप्ते वलनं तद्वदन्तरं वृत्तयोस्तयोः । बिम्बान्तबिम्बमध्योत्थक्रान्तिमौर्व्योस्तदन्तरम् । अर्कदोर्मौर्व्यखण्डघ्नं बिम्बार्द्धं तत्त्वदस्रहृत् । जिनज्याघ्नं त्रिभज्याप्तमेवं स्यादन्तरं हि तत् । बिम्बार्धहृत् त्रिभज्याघ्नमेवं त्रिज्या नतं भवेत् । गुणहारकबिम्बार्धत्रिज्यानाशे कृते सति । भोग्यखण्डं जिनांशज्यागुणं तत्त्वाश्विभाजितम् । सत्रिभार्कात् क्रमक्रान्तेस्तत् तुल्यं जायतेऽथ वा । क्रमक्रान्तेरिदं वीक्ष्य भ्रान्तिं त्यजत बालिशाः ! । नामितं स्वखवद्बिम्बं तिर्यक् क्रान्तिस्तु सा समा । अत्र द्युज्यानुपातो यस्तिर्यक्करणाय सः" मू० । "अथ वलनेषु दृक्कर्मणि चोत्क्रमज्यानिराकरणाय मूलसूत्रेऽपि बहूक्तं तथापि किञ्चिद्विशेषोच्यते । विषुवद्वृत्तं समवृत्तं प्रकल्प्य दक्षिणोत्तरवृत्तस्थे ग्रहे आयनवलनस्योपपत्तिप्रतीत्यर्थं पृथग्दर्शयेत् । अपमण्डलप्राच्यपराया एकः कदम्बो याम्या अन्यः सौम्या दिक् । एवं विषुवद्वृत्तप्राच्यपराया ध्रुवौ । यदा मकरादिर्याम्योत्तरवृत्ते तदैव कदम्बोऽपि । अतो विषुवत्क्रान्तिवृत्तयोरेकैव याम्योदक् । तथा दक्षिणोत्तरवृत्तस्य कुम्भादिस्थ मध्ये स्वाहोरात्रवृत्ते पञ्चगुणाङ्कचन्द्रा १९३५ असवो वर्त्तन्ते । ते षड्भृताः कालांशाः स्युः ३२।१५ । अथ कुम्भादिर्यावद्दक्षिणोत्तरवृत्तं नीयते तावत् कदम्बो निजमण्डले चक्रांशाङ्किते तावद्भिरेव कालांशैः ३२ । १५ दक्षिणोत्तरवृत्तसंपातात् प्रत्यगवलम्बते । कदम्बयाम्योत्तरसूत्रयोरन्तरं वलनम् । सा च तेषामंशानां कदम्बवृत्ते ज्या । अतः क्रमज्या ।